# Shaktistava by Brahma ViShNu and Shiva

# ब्रह्मविष्णुशिवाकृता शक्तिस्तवः

## Document Information

Text title : Shaktistava by Brahma, Vishnu, and Shiva

File name : shaktistavaHbrahmaviShNushivakRRitaH.itx

Category : devii, devI, bRihaddharmapurANam

Location : doc_devii

Proofread by : Ruma Dewan

Description/comments : Brihaddharmapuranam | madhyakhaNDaH | adhyAyaH 41| 1929 ||

Latest update : March 27, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 27, 2023

*sanskritdocuments.org*

# ब्रह्मविष्णुशिवाकृता शक्तिस्तवः

ब्रह्मविष्णुशिवा ऊचुः
देवि प्रसीद परमेऽखिल-मूल-रूपे
चिद्रूपिणी परमसूक्ष्षतरा सदासि ।
न श्रूयसे न च दृशापि च लभ्यसे त्वं
न ध्यायसे च परमाणुहृदा नमस्ते ॥ १॥

निद्राङ्गतस्य पुरुषस्य तनूरुहेषु
गच्छत्पिपीलि-गति-वोध इतीह यश्चा ।
सैव त्वमात्मनि सुयोग-विविक्त-चित्ते
सूक्ष्माति-सूक्ष्म-मतिरेव नमोऽस्तु ते वै ॥ २॥

एतादृशं परमसूक्ष्मतरं महेशि
ज्ञानं न सम्भवति देवमनुष्यकेषु ।
यस्तु प्रशक्यतितरामचलावबोधः
सैवासि मुक्तिरपरा प्रणनामि तुभ्यम् ॥ ३॥

किं सम्भवेत्परमसूक्ष्मकलात्मिकायाः
स्तोत्रप्रणाममननानि तवातिसूक्ष्मे ।
तत्रापि देवि भवतीं प्रतिलब्धुकामाः
स्यामो वयं कृपय देवि परिप्रसीद ॥ ४॥

त्वं स्वेच्छया सृजसि पासि गुणत्रयार्हा-
न्शेषे च संहरसि नोऽपि जगत् किमन्यत् ।
स्थूलासि सूक्ष्षपरमासि महात्मिकासि
त्वं निष्कलानवगमासि निषेधशेषा ॥ ५॥

सानुग्रहात्धृततनूरपि निर्विकारा
श्रूभङ्गमात्रकलिताण्डचयासि देवि ।
तेन प्रणाममननस्तवनादिकानि

कार्याणि कुर्म इह देवि वरे प्रसीद ॥ ६॥

निर्हेतुभक्तिसुलभे भवदुर्लभा त्वं
निर्हेतुभक्तिरपि दुर्घटिता जनेषु ।
तस्माच्छरीर्यपि शरीर-विबन्ध-हीनो
यस्त्वां स्मरेत्स भवतीं समवैति लोके ॥ ७॥

त्वं ब्रह्मविष्णुशिवदेहकरी च विष्णु-
राकाश-कालवद्-तीन्द्रियकासि मातः ।
बह्माण्डकोटिकसमुद्धरलोमकूपा किं
क्षुद्रचेतसि जनैः परिचिन्तनीया ॥ ८॥

दाक्षायणीमपि सतीं सुरुचिं रवीन्दु-
साहस्रकोटिरुचिकां परितः स्मरामः ।
श्यामासि चन्द्रधवलासि च हेमगौरी
रक्तासि चित्तमनुरूपतनुं स्मरामः ॥ ९॥

त्वं वै समस्तसकलात्मसु वर्तमाना
यद्यन्नियोजयसि देवि तदेव सर्वे ।
कुर्वन्ति चाथ खलु ये मम तेऽहमेत-
त्सम्यक्करोम्युत किलेति शिवासि माया ॥ १०॥

काली नवीनघनरूपपरार्द्धचन्द्र-
विभ्राजमानशुभमौलितलामला च ।
दुर्गा लसच्चरणपद्मतला भवानी
माताम्बिका च सदया सततं प्रसीद ॥ ११॥

॥ इति बृहद्धर्मपुराणे ब्रह्मविष्णुशिवाकृता शक्तिस्तवः सम्पूर्णः ॥

॥ बृहद्धर्मपुराणम् । मध्यखण्डः । अध्यायः ४१। १९-२९ ॥

Encoded and proofread by Ruma Dewan

Please send corrections to *sanskrit@cheerful.com*